दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

8) 2.5.6.1(6)- यः । दर्.शपूर्णमासौ ।

यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ ।

9) 2.5.6.1(7)- दर्.शपूर्णमासौ । इष्ट्वा ।

दर्.शपूर्णमासा विष्ट्वेष्ट्वा दर्.शपूर्णमासौ दर्.शपूर्णमासा विष्ट्वा ।

10) 2.5.6.1(7)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

11) 2.5.6.1(8)– इष्ट्वा । सोमेन ।

इष्ट्वा सोमेन सोमेने ष्ट्वे ष्ट्वा सोमेन ।

12) 2.5.6.1(9)– सोमेन । यजते ।

सोमेन यजते यजते सोमेन सोमेन यजते ।

13) 2.5.6.1(10)– यजते । रथस्पष्टे ।

यजते रथस्पष्टे रथस्पष्टे यजते यजते रथस्पष्टे ।

14) 2.5.6.1(11)– रथस्पष्टे । एव ।

रथस्पष्ट एवैव रथस्पष्टे रथस्पष्ट एव ।

15) 2.5.6.1(11)– रथस्पष्टे ।

रथस्पष्ट इति रथ – स्पष्टे ।

16) 2.5.6.1(12)– एव । अवसाने ।

एवावसाने ऽवसान एवैवा वसाने ।

17) 2.5.6.1(13)– अवसाने । वरे ।

अवसाने वरे वरे ऽवसाने ऽवसाने वरे ।

18) 2.5.6.1(13)– अवसाने ।

अवसान इत्यव – साने ।

19) 2.5.6.1(14)– वरे । देवानाम् ।

वरे देवानाम् देवानां ँवरे वरे देवानाम् ।

20) 2.5.6.1(15)– देवानाम् । अव ।

देवाना मवाव देवानाम् देवाना मव ।

21) 2.5.6.1(16)- अव । स्यति ।

अव स्यति स्य त्यवाव स्यति ।

22) 2.5.6.1(17)- स्यति । एतानि ।

स्य त्येता न्येतानि स्यति स्य त्येतानि ।

23) 2.5.6.1(18)- एतानि । वै ।

एतानि वै वा एता न्येतानि वै ।

24) 2.5.6.1(19)- वै । अङ्गापरू(ग्म्)षि ।

वा अङ्गापरू(ग्ग्) ष्यङ्गापरू(ग्म्)षि वै वा अङ्गापरू(ग्म्)षि ।

25) 2.5.6.1(20)- अङ्गापरू(ग्म्)षि । सँवथ्सरस्य ।

अङ्गापरू(ग्म्)षि सँवथ्सरस्य सँवथ्सरस्या ङ्गापरू(ग्ग्) ष्यङ्गापरू(ग्म्)षि सँवथ्सरस्य ।

26) 2.5.6.1(20)- अङ्गापरू(ग्म्)षि ।

अङ्गापरू(ग्म्)षीत्यङ्ग - परू(ग्म्)षि ।

27) 2.5.6.1(21)- सँवथ्सरस्य । यत् ।

सँवथ्सरस्य यद् यथ् सँवथ्सरस्य सँवथ्सरस्य यत् ।

28) 2.5.6.1(21)- सँवथ्सरस्य ।

सँवथ्सरस्येति सं - वथ्सरस्य ।

29) 2.5.6.1(22)- यत् । दर्.शपूर्णमासौ ।

यद् दर्.शपूर्णमासौ दर्.शपूर्णमासौ यद् यद् दर्.शपूर्णमासौ ।

30) 2.5.6.1(23)- दर्.शपूर्णमासौ । यः ।

दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यः ।

31) 2.5.6.1(23)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

32) 2.5.6.1(24)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

33) 2.5.6.1(25)- एवम् । विद्वान् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् ।

34) 2.5.6.1(26)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

35) 2.5.6.1(27)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

36) 2.5.6.1(27)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

37) 2.5.6.1(28)- यजते । अङ्गापरू(ग्म्)षि ।

यजते ऽङ्गापरू(गग्) ष्यङ्गापरू(ग्म्)षि यजते यजते ऽङ्गापरू(ग्म्)षि ।

38) 2.5.6.1(29)- अङ्गापरू(ग्म्)षि । एव ।

अङ्गापरू(गग्) ष्येवैवाङ्गापरू(गग्) ष्यङ्गापरू(गग्)ष्येव ।

39) 2.5.6.1(29)- अङ्गापरू(ग्म्)षि ।

अङ्गापरू(ग्म्)षीत्यङ्गा - परू(ग्म्)षि ।

40) 2.5.6.1(30)- एव । सँवथ्सरस्य ।

एव सँवथ्सरस्य सँवथ्सरस्यैवैव सँवथ्सरस्य ।

41) 2.5.6.1(31)- सँवथ्सरस्य । प्रति ।

सँवथ्सरस्य प्रति प्रति सँवथ्सरस्य सँवथ्सरस्य प्रति ।

42) 2.5.6.1(31)- सँवथ्सरस्य ।

सँवथ्सरस्येति सं - वथ्सरस्य ।

43) 2.5.6.1(32)- प्रति । दधाति ।

प्रति दधाति दधाति प्रति प्रति दधाति ।

44) 2.5.6.1(33)- दधाति । एते ।

दधात्येते एते दधाति दधात्येते ।

45) 2.5.6.1(34)- एते । वै ।

एते वै वा एते एते वै ।

46) 2.5.6.1(34)- एते ।

एते इत्येते ।

47) 2.5.6.1(35)- वै । सँवथ्सरस्य ।

वै सँवथ्सरस्य सँवथ्सरस्य वै वै सँवथ्सरस्य ।

48) 2.5.6.1(36)- सँवथ्सरस्य । चक्षुषी ।

सँवथ्सरस्य चक्षुषी चक्षुषी सँवथ्सरस्य सँवथ्सरस्य चक्षुषी ।

49) 2.5.6.1(36)- सँवथ्सरस्य ।

सँवथ्सरस्येति सं - वथ्सरस्य ।

50) 2.5.6.1(37)- चक्षुषी । यत् ।

चक्षुषी यद् यच् चक्षुषी चक्षुषी यत् ।

51) 2.5.6.1(37)- चक्षुषी ।

चक्षुषी इति चक्षुषी ।

52) 2.5.6.1(38)- यत् । दर्.शपूर्णमासौ ।

यद् दर्.शपूर्णमासौ दर्.शपूर्णमासौ यद् यद् दर्.शपूर्णमासौ ।

53) 2.5.6.1(39)- दर्.शपूर्णमासौ । यः ।

दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यः ।

54) 2.5.6.1(39)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

55) 2.5.6.1(40)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

56) 2.5.6.1(41)- एवम् । विद्वान् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् ।

57) 2.5.6.1(42)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

58) 2.5.6.1(43)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

59) 2.5.6.1(43)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

60) 2.5.6.1(44)- यजते । ताभ्याम् ।

यजते ताभ्याम् ताभ्यां ँयजते यजते ताभ्याम् ।

61) 2.5.6.1(45)- ताभ्याम् । एव ।

ताभ्या मेवैव ताभ्याम् ताभ्या मेव ।

62) 2.5.6.1(46)- एव । सुवर्गम् ।

एव सुवर्ग(ग्म्) सुवर्ग मेवैव सुवर्गम् ।

63) 2.5.6.1(47)- सुवर्गम् । लोकम् ।

सुवर्गम् ँल्लोकम् ँल्लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँल्लोकम् ।

64) 2.5.6.1(47)- सुवर्गम् ।

सुवर्गमिति सुवः - गम् ।

65) 2.5.6.1(48)- लोकम् । अनु ।

लोक मन्वनु लोकम् ँल्लोक मनु ।

66) 2.5.6.1(49)- अनु । पश्यति ।

अनु पश्यति पश्य त्यन्वनु पश्यति ।

67) 2.5.6.1(50)- पश्यति । एषा ।

पश्य त्येषैषा पश्यति पश्य त्येषा ।

1) 2.5.6.2(1)- एषा । वै ।

एषा वै वा एषैषा वै ।

2) 2.5.6.2(2)- वै । देवानाम् ।

वै देवानाम् देवानां ँवै वै देवानाम् ।

3) 2.5.6.2(3)- देवानाम् । विक्रान्तिः ।

देवानां ँविक्रान्तिर् विक्रान्तिर् देवानाम् देवानां ँविक्रान्तिः ।

4) 2.5.6.2(4)- विक्रान्तिः । यत् ।

विक्रान्तिर् यद् यद् विक्रान्तिर् विक्रान्तिर् यत् ।

5) 2.5.6.2(4)- विक्रान्तिः ।

विक्रान्तिरिति वि - क्रान्तिः ।

6) 2.5.6.2(5)- यत् । दर्.शपूर्णमासौ ।

यद् दर्.शपूर्णमासौ दर्.शपूर्णमासौ यद् यद् दर्.शपूर्णमासौ ।

7) 2.5.6.2(6)- दर्.शपूर्णमासौ । यः ।

दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यः ।

8) 2.5.6.2(6)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

9) 2.5.6.2(7)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

10) 2.5.6.2(8)- एवम् । विद्वान् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् ।

11) 2.5.6.2(9)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

12) 2.5.6.2(10)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

13) 2.5.6.2(10)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

14) 2.5.6.2(11)- यजते । देवानाम् ।

यजते देवानाम् देवानां यजते यजते देवानाम् ।

15) 2.5.6.2(12)- देवानाम् । एव ।

देवाना मेवैव देवानाम् देवाना मेव ।

16) 2.5.6.2(13)- एव । विक्रान्तिम् ।

एव विक्रान्तिं विक्रान्ति मेवैव विक्रान्तिम् ।

17) 2.5.6.2(14)- विक्रान्तिम् । अनु ।

विक्रान्ति मन्वनु विक्रान्तिं विक्रान्ति मनु ।

18) 2.5.6.2(14)- विक्रान्तिम् ।

विक्रान्तिमिति वि - क्रान्तिम् ।

19) 2.5.6.2(15)- अनु । वि ।

अनु वि व्यन्वनु वि ।

20) 2.5.6.2(16)- वि । क्रमते ।

वि क्रमते क्रमते वि वि क्रमते ।

21) 2.5.6.2(17)- क्रमते । एषः ।

क्रमत एष एष क्रमते क्रमत एषः ।

22) 2.5.6.2(18)- एषः । वै ।

एष वै वा एष एष वै ।

23) 2.5.6.2(19)- वै । देवयानः ।

वै देवयानो देवयानो वै वै देवयानः ।

24) 2.5.6.2(20)- दे॒व॒यानः॑ । पन्थाः॒ ।

दे॒व॒या॒नः॒ पन्थाः॒ पन्था॑ दे॒व॒यानो॑ दे॒व॒या॒नः॒ पन्थाः॑ ।

25) 2.5.6.2(20)- दे॒व॒यानः॑ ।

दे॒व॒या॒न इति॑ देव - या॒नः॑ ।

26) 2.5.6.2(21)- पन्थाः॒ । यत् ।

पन्था॒ यद् यत् पन्थाः॒ पन्था॒ यत् ।

27) 2.5.6.2(22)- यत् । द॒र्.श॒पू॒र्ण॒मा॒सौ ।

यद् द॑र्.शपूर्णमा॒सौ द॑र्.शपूर्णमा॒सौ यद् यद् द॑र्.शपूर्णमा॒सौ ।

28) 2.5.6.2(23)- द॒र्.श॒पू॒र्ण॒मा॒सौ । यः ।

द॒र्.श॒पू॒र्ण॒मा॒सौ यो यो द॑र्.शपूर्णमा॒सौ द॑र्.शपूर्णमा॒सौ यः ।

29) 2.5.6.2(23)- द॒र्.श॒पू॒र्ण॒मा॒सौ ।

द॒र्.श॒पू॒र्ण॒मा॒सावि॑ति दर्.श - पू॒र्ण॒मा॒सौ ।

30) 2.5.6.2(24)- यः । ए॒वम् ।

य ए॒व मे॒वं ँयो य ए॒वम् ।

31) 2.5.6.2(25)- ए॒वम् । वि॒द्वान् ।

ए॒वं ँवि॒द्वान्. वि॒द्वा ने॒व मे॒वं ँवि॒द्वान् ।

32) 2.5.6.2(26)- वि॒द्वान् । द॒र्.श॒पू॒र्ण॒मा॒सौ ।

वि॒द्वान् द॑र्.शपूर्णमा॒सौ द॑र्.शपूर्णमा॒सौ वि॒द्वान्. वि॒द्वान् द॑र्.शपूर्णमा॒सौ ।

33) 2.5.6.2(27)- द॒र्.श॒पू॒र्ण॒मा॒सौ । यज॑ते ।

द॒र्.श॒पू॒र्ण॒मा॒सौ यज॑ते॒ यज॑ते दर्.शपूर्णमा॒सौ द॑र्.शपूर्णमा॒सौ यज॑ते ।

34) 2.5.6.2(27)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

35) 2.5.6.2(28)- यजते । यः ।

यजते यो यो यजते यजते यः ।

36) 2.5.6.2(29)- यः । एव ।

य एवैव यो य एव ।

37) 2.5.6.2(30)- एव । देवयानः ।

एव देवयानो देवयान एवैव देवयानः ।

38) 2.5.6.2(31)- देवयानः । पन्थाः ।

देवयानः पन्थाः पन्था देवयानो देवयानः पन्थाः ।

39) 2.5.6.2(31)- देवयानः ।

देवयान इति देव - यानः ।

40) 2.5.6.2(32)- पन्थाः । तम् ।

पन्था स्तम् तम् पन्थाः पन्था स्तम् ।

41) 2.5.6.2(33)- तम् । समारोहति ।

त(ग्म्) समारोहति समारोहति तम् त(ग्म्) समारोहति ।

42) 2.5.6.2(34)- समारोहति । एतौ ।

समारोह त्येता वेतौ समारोहति समारोह त्येतौ ।

43) 2.5.6.2(34)- समारोहति ।

समारोहतीति सं - आरोहति ।

44) 2.5.6.2(35)- एतौ । वै ।

एतौ वै वा एता वेतौ वै ।

45) 2.5.6.2(36)- वै । देवानाम् ।

वै देवानाम् देवानां ँवै वै देवानाम् ।

46) 2.5.6.2(37)- देवानाम् । हरी ।

देवाना(ग्म्) हरी हरी देवानाम् देवाना(ग्म्) हरी ।

47) 2.5.6.2(38)- हरी । यत् ।

हरी यद् य द्धरी हरी यत् ।

48) 2.5.6.2(38)- हरी ।

हरी इति हरी ।

49) 2.5.6.2(39)- यत् । दर्.शपूर्णमासौ ।

यद् दर्.शपूर्णमासौ दर्.शपूर्णमासौ यद् यद् दर्.शपूर्णमासौ ।

50) 2.5.6.2(40)- दर्.शपूर्णमासौ । यः ।

दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यः ।

51) 2.5.6.2(40)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ ।

52) 2.5.6.2(41)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

53) 2.5.6.2(42)- एवम् । विद्वान् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् ।

54) 2.5.6.2(43)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

55) 2.5.6.2(44)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

56) 2.5.6.2(44)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

57) 2.5.6.2(45)- यजते । यौ ।

यजते यौ यौ यजते यजते यौ ।

58) 2.5.6.2(46)- यौ । एव ।

या वेवैव यौ या वेव ।

59) 2.5.6.2(47)- एव । देवानाम् ।

एव देवानाम् देवाना मेवैव देवानाम् ।

60) 2.5.6.2(48)- देवानाम् । हरी ।

देवाना(ग्म्) हरी हरी देवानाम् देवाना(ग्म्) हरी ।

61) 2.5.6.2(49)- हरी । ताभ्याम् ।

हरी ताभ्याम् ताभ्या(ग्म्) हरी हरी ताभ्याम् ।

62) 2.5.6.2(49)- हरी ।

हरी इति हरी ।

63) 2.5.6.2(50)- ताभ्याम् । एव ।

ताभ्या मेवैव ताभ्याम् ताभ्या मेव ।

1) 2.5.6.3(1)- एव । एभ्यः ।

एवैभ्य एभ्य एवैवैभ्यः ।

2) 2.5.6.3(2)- एभ्यः । हव्यम् ।

एभ्यो हव्य(ग्म्) हव्य मेभ्य एभ्यो हव्यम् ।

3) 2.5.6.3(3)- हव्यम् । वहति ।

हव्यं ँवहति वहति हव्य(ग्म्) हव्यं ँवहति ।

4) 2.5.6.3(4)- वहति । एतत् ।

वह त्येत देतद् वहति वह त्येतत् ।

5) 2.5.6.3(5)- एतत् । वै ।

एतद् वै वा एत देतद् वै ।

6) 2.5.6.3(6)- वै । देवानाम् ।

वै देवानाम् देवानां ँवै वै देवानाम् ।

7) 2.5.6.3(7)- देवानाम् । आस्यम् ।

देवाना मास्य मास्यम् देवानाम् देवाना मास्यम् ।

8) 2.5.6.3(8)- आस्यम् । यत् ।

आस्यं ँयद् यदास्य मास्यं ँयत् ।

9) 2.5.6.3(9)- यत् । दर्.शपूर्णमासौ ।

यद् दर्.शपूर्णमासौ दर्.शपूर्णमासौ यद् यद् दर्.शपूर्णमासौ ।

10) 2.5.6.3(10)- दर्.शपूर्णमासौ । यः ।

दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यः ।

11) 2.5.6.3(10)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

12) 2.5.6.3(11)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

13) 2.5.6.3(12)- एवम् । विद्वान् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् ।

14) 2.5.6.3(13)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

15) 2.5.6.3(14)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

16) 2.5.6.3(14)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

17) 2.5.6.3(15)- यजते । साक्षात् ।

यजते साक्षाथ् साक्षाद् यजते यजते साक्षात् ।

18) 2.5.6.3(16)- साक्षात् । एव ।

साक्षा देवैव साक्षाथ् साक्षा देव ।

19) 2.5.6.3(16)- साक्षात् ।

साक्षादिति स - अक्षात् ।

20) 2.5.6.3(17)- एव । देवानाम् ।

एव देवानाम् देवाना मेवैव देवानाम् ।

21) 2.5.6.3(18)- देवानाम् । आस्ये ।

देवाना मास्य आस्ये देवानाम् देवाना मास्ये ।

22) 2.5.6.3(19)- आस्ये । जुहोति ।

आस्ये जुहोति जुहो त्यास्य आस्ये जुहोति ।

23) 2.5.6.3(20)- जुहोति । एषः ।

जुहो त्येष एष जुहोति जुहो त्येषः ।

24) 2.5.6.3(21)- एषः । वै ।

एष वै वा एष एष वै ।

25) 2.5.6.3(22)- वै । हविर्द्धानी ।

वै हविर्द्धानी हविर्द्धानी वै वै हविर्द्धानी ।

26) 2.5.6.3(23)- हविर्द्धानी । यः ।

हविर्द्धानी यो यो हविर्द्धानी हविर्द्धानी यः ।

27) 2.5.6.3(23)- हविर्द्धानी ।

हविर्द्धानीति हविः - धानी ।

28) 2.5.6.3(24)- यः । दर्.शपूर्णमासयाजी ।

यो दर्.शपूर्णमासयाजी दर्.शपूर्णमासयाजी यो यो दर्.शपूर्णमासयाजी ।

29) 2.5.6.3(25)- दर्.शपूर्णमासयाजी । सायंप्रातः ।

दर्.शपूर्णमासयाजी सायंप्रातः सायंप्रातर् दर्.शपूर्णमासयाजी दर्.शपूर्णमासयाजी सायंप्रातः ।

30) 2.5.6.3(25)- दर्.शपूर्णमासयाजी ।

दर्.शपूर्णमासयाजीति दर्.शपूर्णमास - याजी ।

31) 2.5.6.3(26)- सायंप्रातः । अग्निहोत्रम् ।

सायंप्रात रग्निहोत्र मग्निहोत्र(गम्) सायंप्रातः सायंप्रात रग्निहोत्रम् ।

32) 2.5.6.3(26)- सायंप्रातः ।

सायंप्रातरिति सायं - प्रातः ।

33) 2.5.6.3(27)- अग्निहोत्रम् । जुहोति ।

अग्निहोत्रम् जुहोति जुहोत्यग्निहोत्र मग्निहोत्रम् जुहोति ।

34) 2.5.6.3(27)- अग्निहोत्रम् ।

अग्निहोत्रमित्यग्नि - होत्रम् ।

35) 2.5.6.3(28)- जुहोति । यजते ।

जुहोति यजते यजते जुहोति जुहोति यजते ।

36) 2.5.6.3(29)- यजते । दर्.शपूर्णमासौ ।

यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ ।

37) 2.5.6.3(30)- दर्.शपूर्णमासौ । अहरहः ।

दर्.शपूर्णमासा वहरह रहरहर् दर्.शपूर्णमासौ दर्.शपूर्णमासा वहरहः ।

38) 2.5.6.3(30)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

39) 2.5.6.3(31)- अहरहः । हविर्द्धानिनाम् ।

अहरहर्. हविर्द्धानिना(गम्) हविर्द्धानिना महरह रहरहर्. हविर्द्धानिनाम् ।

40) 2.5.6.3(31)- अहरहः ।

अहरहरित्यहः - अहः ।

41) 2.5.6.3(32)- हविर्द्धानिनाम् । सुतः ।

हविर्द्धानिना(ग्म्) सुतः सुतो हविर्द्धानिना(ग्म्) हविर्द्धानिना(ग्म्) सुतः ।

42) 2.5.6.3(32)- हविर्द्धानिनाम् ।

हविर्द्धानिनामिति हविः - धानिनाम् ।

43) 2.5.6.3(33)- सुतः । यः ।

सुतो यो यः सुतः सुतो यः ।

44) 2.5.6.3(34)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

45) 2.5.6.3(35)- एवम् । विद्वान् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् ।

46) 2.5.6.3(36)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

47) 2.5.6.3(37)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

48) 2.5.6.3(37)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

49) 2.5.6.3(38)- यजते । हविर्द्धानी ।

यजते हविर्द्धानी हविर्द्धानी यजते यजते हविर्द्धानी ।

50) 2.5.6.3(39)- हविर्द्धानी । अस्मि । (GS-2.5-23)

हविर्द्धा न्यस्म्यस्मि हविर्द्धानी हविर्द्धा न्यस्मि ।

51) 2.5.6.3(39)- ह॒वि॒र्धा॒नी । (GS-2.5-23)

ह॒वि॒र्धा॒नीति॑ ह॒विः - धा॒नी ।

52) 2.5.6.3(40)- अ॒स्मि॒ । इति॑ । (GS-2.5-23)

अ॒स्मीती त्य॑स्म्य॒ स्मीति॑ ।

53) 2.5.6.3(41)- इति॑ । सर्व॒॑म् । (GS-2.5-23)

इ॒ति॒ स॒र्व॒(ग्म्॒) स॒र्व॒ मितीति॑ सर्व॒॑म् ।

54) 2.5.6.3(42)- सर्व॒॑म् । ए॒व । (GS-2.5-23)

सर्व॑ मे॒वैव स॒र्व॒(ग्म्॒) सर्व॑ मे॒व ।

55) 2.5.6.3(43)- ए॒व । अ॒स्य॒ । (GS-2.5-23)

ए॒वास्या॒॑ स्यै॒वैवास्य॑ ।

56) 2.5.6.3(44)- अ॒स्य॒ । ब॒र्.हि॒ष्य॒॑म् । (GS-2.5-23)

अ॒स्य॒ ब॒र्.हि॒ष्य॑म् ब॒र्.हि॒ष्य॑ मस्यास्य ब॒र्.हि॒ष्य॒॑म् ।

57) 2.5.6.3(45)- ब॒र्.हि॒ष्य॒॑म् । द॒त्तम् । (GS-2.5-23)

ब॒र्.हि॒ष्य॑म् द॒त्तम् द॒त्तम् ब॑र्.हि॒ष्य॑म् ब॒र्.हि॒ष्य॑म् द॒त्तम् ।

58) 2.5.6.3(46)- द॒त्तम् । भ॒व॒ति॒ ।

द॒त्तम् भ॑वति भवति द॒त्तम् द॒त्तम् भ॑वति ।

59) 2.5.6.3(47)- भ॒व॒ति॒ । दे॒वाः ।

भ॒व॒ति॒ दे॒वा दे॒वा भ॑वति भवति दे॒वाः ।

60) 2.5.6.3(48)- दे॒वाः । वै ।

दे॒वा वै वै दे॒वा दे॒वा वै ।

61) 2.5.6.3(49)- वै । अहः ।

वा अह रहर् वै वा अहः ।

62) 2.5.6.3(50)- अहः । यज्ञियम् ।

अहर् यज्ञियं ँयज्ञिय मह रहर् यज्ञियम् ।

1) 2.5.6.4(1)- यज्ञियम् । न ।

यज्ञियम् न न यज्ञियं ँयज्ञियम् न ।

2) 2.5.6.4(2)- न । अविन्दन्न् ।

नाविन्दन् नविन्दन् न नाविन्दन्न् ।

3) 2.5.6.4(3)- अविन्दन्न् । ते ।

अविन्दन् ते ते ऽविन्दन् नविन्दन् ते ।

4) 2.5.6.4(4)- ते । दर्.शपूर्णमासौ ।

ते दर्.शपूर्णमासौ दर्.शपूर्णमासौ ते ते दर्.शपूर्णमासौ ।

5) 2.5.6.4(5)- दर्.शपूर्णमासौ । अपुनन्न् ।

दर्.शपूर्णमासा वपुनन् नपुनन् दर्.शपूर्णमासौ दर्.शपूर्णमासा वपुनन्न् ।

6) 2.5.6.4(5)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ ।

7) 2.5.6.4(6)- अपुनन्न् । तौ ।

अपुनन् तौ ता वपुनन् नपुनन् तौ ।

8) 2.5.6.4(7)- तौ । वै ।

तौ वै वै तौ तौ वै ।

9) 2.5.6.4(8)- वै । एतौ ।

वा एता वेतौ वै वा एतौ ।

10) 2.5.6.4(9)- एतौ । पूतौ ।

एतौ पूतौ पूता वेता वेतौ पूतौ ।

11) 2.5.6.4(10)- पूतौ । मेद्ध्यौ ।

पूतौ मेद्ध्यौ मेद्ध्यौ पूतौ पूतौ मेद्ध्यौ ।

12) 2.5.6.4(11)- मेद्ध्यौ । यत् ।

मेद्ध्यौ यद् यन् मेद्ध्यौ मेद्ध्यौ यत् ।

13) 2.5.6.4(12)- यत् । दर्.शपूर्णमासौ ।

यद् दर्.शपूर्णमासौ दर्.शपूर्णमासौ यद् यद् दर्.शपूर्णमासौ ।

14) 2.5.6.4(13)- दर्.शपूर्णमासौ । यः ।

दर्.शपूर्णमासौ यो यो दर्.शपूर्णमासौ दर्.शपूर्णमासौ यः ।

15) 2.5.6.4(13)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

16) 2.5.6.4(14)- यः । एवम् ।

य एव मेवँ यो य एवम् ।

17) 2.5.6.4(15)- एवम् । विद्वान् ।

एवँ विद्वान्. विद्वा नेव मेवँ विद्वान् ।

18) 2.5.6.4(16)- विद्वान् । दर्.शपूर्णमासौ ।

विद्वान् दर्.शपूर्णमासौ दर्.शपूर्णमासौ विद्वान्. विद्वान् दर्.शपूर्णमासौ ।

19) 2.5.6.4(17)- दर्.शपूर्णमासौ । यजते ।

दर्.शपूर्णमासौ यजते यजते दर्.शपूर्णमासौ दर्.शपूर्णमासौ यजते ।

20) 2.5.6.4(17)- दर्.शपूर्णमासौ ।

दर्.शपूर्णमासाविति दर्.श - पूर्णमासौ ।

21) 2.5.6.4(18)- यजते । पूतौ ।

यजते पूतौ पूतौ यजते यजते पूतौ ।

22) 2.5.6.4(19)- पूतौ । एव ।

पूता वेवैव पूतौ पूता वेव ।

23) 2.5.6.4(20)- एव । एनौ ।

एवैना वेना वेवैवैनौ ।

24) 2.5.6.4(21)- एनौ । मेद्ध्यौ ।

एनौ मेद्ध्यौ मेद्ध्या वेना वेनौ मेद्ध्यौ ।

25) 2.5.6.4(22)- मेद्ध्यौ । यजते ।

मेद्ध्यौ यजते यजते मेद्ध्यौ मेद्ध्यौ यजते ।

26) 2.5.6.4(23)- यजते । न ।

यजते न न यजते यजते न ।

27) 2.5.6.4(24)- न । अमावास्यायाम् ।

नामावास्याया ममावास्यायान्न नामावास्यायाम् ।

28) 2.5.6.4(25)- अमावास्यायाम् । च ।

अमावास्यायाम् च चामावास्याया ममावास्यायाम् च ।

29) 2.5.6.4(25)- अमावास्यायाम् ।

अमावास्यायामित्यमा - वास्यायाम् ।

30) 2.5.6.4(26)- च । पौर्णमास्याम् ।

च पौर्णमास्याम् पौर्णमास्याम् च च पौर्णमास्याम् ।

31) 2.5.6.4(27)- पौर्णमास्याम् । च ।

पौर्णमास्याम् च च पौर्णमास्याम् पौर्णमास्याम् च ।

32) 2.5.6.4(27)- पौर्णमास्याम् ।

पौर्णमास्यामिति पौर्ण - मास्याम् ।

33) 2.5.6.4(28)- च । स्त्रियम् ।

च स्त्रिय(गग्) स्त्रियम् च च स्त्रियम् ।

34) 2.5.6.4(29)- स्त्रियम् । उप ।

स्त्रिय मुपोप स्त्रिय(गग्) स्त्रिय मुप ।

35) 2.5.6.4(30)- उप । इयात् ।

उपे यादिया दुपोपे यात् ।

36) 2.5.6.4(31)- इयात् । यत् ।

इयाद् यद् यदिया दियाद् यत् ।

37) 2.5.6.4(32)- यत् । उपेयात् ।

यदुपेया दुपेयाद् यद् यदुपेयात् ।

38) 2.5.6.4(33)- उपेयात् । निरिन्द्रियः ।

उपेयान् निरिन्द्रियो निरिन्द्रिय उपेया दुपेयान् निरिन्द्रियः ।

39) 2.5.6.4(33)- उपेयात् ।

उपेयादित्युप - इयात् ।

40) 2.5.6.4(34)- निरिन्द्रियः । स्यात् ।

निरिन्द्रियः स्याथ् स्यान् निरिन्द्रियो निरिन्द्रियः स्यात् ।

41) 2.5.6.4(34)- निरिन्द्रियः ।

निरिन्द्रिय इति निः - इन्द्रियः ।

42) 2.5.6.4(35)- स्यात् । सोमस्य ।

स्याथ् सोमस्य सोमस्य स्याथ् स्याथ् सोमस्य ।

43) 2.5.6.4(36)- सोमस्य । वै ।

सोमस्य वै वै सोमस्य सोमस्य वै ।

44) 2.5.6.4(37)- वै । राज्ञः ।

वै राज्ञो राज्ञो वै वै राज्ञः ।

45) 2.5.6.4(38)- राज्ञः । अर्द्धमासस्य ।

राज्ञो ऽर्द्धमासस्या र्द्धमासस्य राज्ञो राज्ञो ऽर्द्धमासस्य ।

46) 2.5.6.4(39)- अर्द्धमासस्य । रात्रयः ।

अर्द्धमासस्य रात्रयो रात्रयो ऽर्द्धमासस्या र्द्धमासस्य रात्रयः ।

47) 2.5.6.4(39)- अर्द्धमासस्य ।

अर्द्धमासस्येत्यर्द्ध - मासस्य ।

48) 2.5.6.4(40)- रात्रयः । पत्नयः ।

रात्रयः पत्नयः पत्नयो रात्रयो रात्रयः पत्नयः ।

49) 2.5.6.4(41)- पल्नयः । आसन्न् ।

पल्नय आसन् नासन् पल्नयः पल्नय आसन्न् ।

50) 2.5.6.4(42)- आसन्न् । तासाम् ।

आसन् तासाम् तासा मासन् नासन् तासाम् ।

51) 2.5.6.4(43)- तासाम् । अमावास्याम् ।

तासा ममावास्या ममावास्याम् तासाम् तासा ममावास्याम् ।

52) 2.5.6.4(44)- अमावास्याम् । च ।

अमावास्याम् च चामावास्या ममावास्याम् च ।

53) 2.5.6.4(44)- अमावास्याम् ।

अमावास्यामित्यमा - वास्याम् ।

54) 2.5.6.4(45)- च । पौर्णमासीम् ।

च पौर्णमासीम् पौर्णमासीम् च च पौर्णमासीम् ।

55) 2.5.6.4(46)- पौर्णमासीम् । च ।

पौर्णमासीम् च च पौर्णमासीम् पौर्णमासीम् च ।

56) 2.5.6.4(46)- पौर्णमासीम् ।

पौर्णमासीमिति पौर्ण - मासीम् ।

57) 2.5.6.4(47)- च । न ।

च न न च च न ।

58) 2.5.6.4(48)- न । उप ।

नोपोप न नोप ।

59) 2.5.6.4(49)- उप । ऐत् ।

उपै दैदुपो पैत् ।

60) 2.5.6.4(50)- ऐत् । ते ।

ऐत् ते ते ऐदैत् ते ।

1) 2.5.6.5(1)- ते । एनम् ।

ते एन मेनम् ते ते एनम् ।

2) 2.5.6.5(1)- ते ।

ते इति ते ।

3) 2.5.6.5(2)- एनम् । अभि ।

एन मभ्या(1)भ्येन मेन मभि ।

4) 2.5.6.5(3)- अभि । सम् ।

अभि स(ग्म्) स मभ्यभि सम् ।

5) 2.5.6.5(4)- सम् । अनह्येताम् ।

स मनह्येता मनह्येता(ग्म्) स(ग्म्) स मनह्येताम् ।

6) 2.5.6.5(5)- अनह्येताम् । तम् ।

अनह्येताम् तम् त मनह्येता मनह्येताम् तम् ।

7) 2.5.6.5(6)- तम् । यक्ष्मः ।

तं ँयक्ष्मो यक्ष्म स्तम् तं ँयक्ष्मः ।

8) 2.5.6.5(7)- यक्ष्मः । आर्च्छत् ।

यक्ष्म आर्च्छ दार्च्छद् यक्ष्मो यक्ष्म आर्च्छत् ।

9) 2.5.6.5(8)- आर्च्छत् । राजानम् ।

आर्च्छद् राजान(ग्म्) राजान मार्च्छ दार्च्छद् राजानम् ।

10) 2.5.6.5(9)- राजानम् । यक्ष्मः ।

राजानं ँयक्ष्मो यक्ष्मो राजान(ग्म्) राजानं ँयक्ष्मः ।

11) 2.5.6.5(10)- यक्ष्मः । आरत् ।

यक्ष्म आर दारद् यक्ष्मो यक्ष्म आरत् ।

12) 2.5.6.5(11)- आरत् । इति ।

आरदिती त्यार दारदिति ।

13) 2.5.6.5(12)- इति । तत् ।

इति तत् तदितीति तत् ।

14) 2.5.6.5(13)- तत् । राजयक्ष्मस्य ।

तद् राजयक्ष्मस्य राजयक्ष्मस्य तत् तद् राजयक्ष्मस्य ।

15) 2.5.6.5(14)- राजयक्ष्मस्य । जन्म ।

राजयक्ष्मस्य जन्म जन्म राजयक्ष्मस्य राजयक्ष्मस्य जन्म ।

16) 2.5.6.5(14)- राजयक्ष्मस्य ।

राजयक्ष्मस्येति राज - यक्ष्मस्य ।

17) 2.5.6.5(15)- जन्म । यत् ।

जन्म यद् यज् जन्म जन्म यत् ।

18) 2.5.6.5(16)- यत् । पापीयान् ।

यत् पापीयान् पापीयान्. यद् यत् पापीयान् ।

19) 2.5.6.5(17)- पापीयान् । अभवत् ।

पापीया नभव दभवत् पापीयान् पापीया नभवत् ।

20) 2.5.6.5(18)- अभवत् । तत् ।

अभवत् तत् तदभव दभवत् तत् ।

21) 2.5.6.5(19)- तत् । पापयक्ष्मस्य ।

तत् पापयक्ष्मस्य पापयक्ष्मस्य तत् तत् पापयक्ष्मस्य ।

22) 2.5.6.5(20)- पापयक्ष्मस्य । यत् ।

पापयक्ष्मस्य यद् यत् पापयक्ष्मस्य पापयक्ष्मस्य यत् ।

23) 2.5.6.5(20)- पापयक्ष्मस्य ।

पापयक्ष्मस्येति पाप - यक्ष्मस्य ।

24) 2.5.6.5(21)- यत् । जायाभ्याम् ।

यज् जायाभ्याम् जायाभ्यां ँयद् यज् जायाभ्याम् ।

25) 2.5.6.5(22)- जायाभ्याम् । अविन्दत् ।

जायाभ्या मविन्द दविन्दज् जायाभ्याम् जायाभ्या मविन्दत् ।

26) 2.5.6.5(23)- अविन्दत् । तत् ।

अविन्दत् तत् तदविन्द दविन्दत् तत् ।

27) 2.5.6.5(24)- तत् । जायेन्यस्य ।

तज् जायेन्यस्य जायेन्यस्य तत् तज् जायेन्यस्य ।

28) 2.5.6.5(25)- जायेन्यस्य । यः ।

जायेन्यस्य यो यो जायेन्यस्य जायेन्यस्य यः ।

29) 2.5.6.5(26)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

30) 2.5.6.5(27)- एवम् । एतेषाम् ।

एव मेतेषा मेतेषा मेव मेव मेतेषाम् ।

31) 2.5.6.5(28)- एतेषाम् । यक्ष्माणाम् ।

एतेषां ँयक्ष्माणां ँयक्ष्माणा मेतेषा मेतेषां ँयक्ष्माणाम् ।

32) 2.5.6.5(29)- यक्ष्माणाम् । जन्म ।

यक्ष्माणाम् जन्म जन्म यक्ष्माणां ँयक्ष्माणाम् जन्म ।

33) 2.5.6.5(30)- जन्म । वेद ।

जन्म वेद वेद जन्म जन्म वेद ।

34) 2.5.6.5(31)- वेद । न ।

वेद न न वेद वेद न ।

35) 2.5.6.5(32)- न । एनम् ।

नैन मेनम् न नैनम् ।

36) 2.5.6.5(33)- एनम् । एते ।

एन मेत एत एन मेन मेते ।

37) 2.5.6.5(34)- एते । यक्ष्माः ।

एते यक्ष्मा यक्ष्मा एत एते यक्ष्माः ।

38) 2.5.6.5(35)- यक्ष्माः । विन्दन्ति ।

यक्ष्मा विन्दन्ति विन्दन्ति यक्ष्मा यक्ष्मा विन्दन्ति ।

39) 2.5.6.5(36)- विन्दन्ति । सः ।

विन्दन्ति स स विन्दन्ति विन्दन्ति सः ।

40) 2.5.6.5(37)- सः । एते ।

स एते एते स स एते ।

41) 2.5.6.5(38)- एते । एव ।

एते एवैवैते एते एव ।

42) 2.5.6.5(38)- एते ।

एते इत्येते ।

43) 2.5.6.5(39)- एव । नमस्यन्न् ।

एव नमस्यन् नमस्यन् नेवैव नमस्यन्न् ।

44) 2.5.6.5(40)- नमस्यन्न् । उप ।

नमस्यन् नुपोप नमस्यन् नमस्यन् नुप ।

45) 2.5.6.5(41)- उप । अधावत् ।

उपाधाव दधाव दुपोपा धावत् ।

46) 2.5.6.5(42)- अधावत् । ते ।

अधावत् ते ते अधाव दधावत् ते ।

47) 2.5.6.5(43)- ते । अब्रूताम् ।

ते अब्रूता मब्रूताम् ते ते अब्रूताम् ।

48) 2.5.6.5(43)- ते ।

ते इति ते ।

49) 2.5.6.5(44)- अब्रूताम् । वरम् ।

अब्रूतां वरं वर मब्रूता मब्रूतां वरम् ।

50) 2.5.6.5(45)- वरम् । वृणावहै ।

वरं वृणावहै वृणावहै वरं वरं वृणावहै ।

51) 2.5.6.5(46)- वृणावहै । आवम् ।

वृणावहा आव मावं वृणावहै वृणावहा आवम् ।

52) 2.5.6.5(47)- आवम् । देवानाम् ।

आवम् देवानाम् देवाना माव मावम् देवानाम् ।

53) 2.5.6.5(48)- देवानाम् । भागधे ।

देवानाम् भागधे भागधे देवानाम् देवानाम् भागधे ।

54) 2.5.6.5(49)- भागधे । असाव ।

भागधे असावा साव भागधे भागधे असाव ।

55) 2.5.6.5(49)- भागधे ।

भागधे इति भाग - धे ।

56) 2.5.6.5(50)- असाव । आवत् ।

असा वाव दाव दसावा सावावत् ।

1) 2.5.6.6(1)- आवत् । अधि ।

आवद ध्य ध्यावदा वदधि ।

2) 2.5.6.6(2)- अधि । देवाः ।

अधि देवा देवा अध्यधि देवाः ।

3) 2.5.6.6(3)- देवाः । इज्यान्तै ।

देवा इज्यान्ता इज्यान्तै देवा देवा इज्यान्तै ।

4) 2.5.6.6(4)- इज्यान्तै । इति ।

इज्यान्ता इतीती ज्यान्ता इज्यान्ता इति ।

5) 2.5.6.6(5)- इति । तस्मात् ।

इति तस्मात् तस्मा दितीति तस्मात् ।

6) 2.5.6.6(6)- तस्मात् । सदृशीनाम् ।

तस्माथ् सदृशीना(ग्म्) सदृशीनाम् तस्मात् तस्माथ् सदृशीनाम् ।

7) 2.5.6.6(7)- सदृशीनाम् । रात्रीणाम् ।

सदृशीना(ग्म्) रात्रीणा(ग्म्) रात्रीणा(ग्म्) सदृशीना(ग्म्) सदृशीना(ग्म्) रात्रीणाम् ।

8) 2.5.6.6(8)- रात्रीणाम् । अमावास्यायाम् ।

रात्रीणा ममावास्याया ममावास्याया(ग्म्) रात्रीणा(ग्म्) रात्रीणा ममावास्यायाम् ।

9) 2.5.6.6(9)- अमावास्यायाम् । च ।

अमावास्यायाम् च चामावास्याया ममावास्यायाम् च ।

10) 2.5.6.6(9)- अमावास्यायाम् ।

अमावास्यायामित्यमा – वास्यायाम् ।

11) 2.5.6.6(10)- च । पौर्णमास्याम् ।

च पौर्णमास्याम् पौर्णमास्याम् च च पौर्णमास्याम् ।

12) 2.5.6.6(11)- पौर्णमास्याम् । च ।

पौर्णमास्याम् च च पौर्णमास्याम् पौर्णमास्याम् च ।

13) 2.5.6.6(11)- पौर्णमास्याम् ।

पौर्णमास्यामिति पौर्ण - मास्याम् ।

14) 2.5.6.6(12)- च । देवाः ।

च देवा देवाश्च च देवाः ।

15) 2.5.6.6(13)- देवाः । इज्यन्ते ।

देवा इज्यन्त इज्यन्ते देवा देवा इज्यन्ते ।

16) 2.5.6.6(14)- इज्यन्ते । एते ।

इज्यन्त एते एते इज्यन्त इज्यन्त एते ।

17) 2.5.6.6(15)- एते । हि ।

एते हि ह्येते एते हि ।

18) 2.5.6.6(15)- एते ।

एते इत्येते ।

19) 2.5.6.6(16)- हि । देवानाम् ।

हि देवानाम् देवाना(ग्म्) हि हि देवानाम् ।

20) 2.5.6.6(17)- देवानाम् । भागधे ।

देवानाम् भागधे भागधे देवानाम् देवानाम् भागधे ।

21) 2.5.6.6(18)- भागधे । भागधाः ।

भागधे भागधा भागधा भागधे भागधे भागधाः ।

22) 2.5.6.6(18)- भागधे ।

भागधे इति भाग - धे ।

23) 2.5.6.6(19)- भागधाः । अस्मै ।

भागधा अस्मा अस्मै भागधा भागधा अस्मै ।

24) 2.5.6.6(19)- भागधाः ।

भागधा इति भाग - धाः ।

25) 2.5.6.6(20)- अस्मै । मनुष्याः ।

अस्मै मनुष्या मनुष्या अस्मा अस्मै मनुष्याः ।

26) 2.5.6.6(21)- मनुष्याः । भवन्ति ।

मनुष्या भवन्ति भवन्ति मनुष्या मनुष्या भवन्ति ।

27) 2.5.6.6(22)- भवन्ति । यः ।

भवन्ति यो यो भवन्ति भवन्ति यः ।

28) 2.5.6.6(23)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

29) 2.5.6.6(24)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

30) 2.5.6.6(25)- वेद । भूतानि ।

वेद भूतानि भूतानि वेद वेद भूतानि ।

31) 2.5.6.6(26)- भूतानि । क्षुधम् ।

भूतानि क्षुधम् क्षुधम् भूतानि भूतानि क्षुधम् ।

32) 2.5.6.6(27)- क्षुधम् । अघ्नन्न् ।

क्षुध मघ्नन् नघ्नन् क्षुधम् क्षुध मघ्नन्न् ।

33) 2.5.6.6(28)- अघ्नन्न् । सद्यः ।

अघ्नन् थ्सद्यः सद्यो ऽघ्नन् नघ्नन् थ्सद्यः ।

34) 2.5.6.6(29)- सद्यः । मनुष्याः ।

सद्यो मनुष्या मनुष्याः सद्यः सद्यो मनुष्याः ।

35) 2.5.6.6(30)- मनुष्याः । अर्द्धमासे ।

मनुष्या अर्द्धमासे ऽर्द्धमासे मनुष्या मनुष्या अर्द्धमासे ।

36) 2.5.6.6(31)- अर्द्धमासे । देवाः ।

अर्द्धमासे देवा देवा अर्द्धमासे ऽर्द्धमासे देवाः ।

37) 2.5.6.6(31)- अर्द्धमासे ।

अर्द्धमास इत्यर्द्ध - मासे ।

38) 2.5.6.6(32)- देवाः । मासि ।

देवा मासि मासि देवा देवा मासि ।

39) 2.5.6.6(33)- मासि । पितरः ।

मासि पितरः पितरो मासि मासि पितरः ।

40) 2.5.6.6(34)- पितरः । सँवथ्सरे ।

पितरः सँवथ्सरे सँवथ्सरे पितरः पितरः सँवथ्सरे ।

41) 2.5.6.6(35)- सँवथ्सरे । वनस्पतयः ।

सँवथ्सरे वनस्पतयो वनस्पतयः सँवथ्सरे सँवथ्सरे वनस्पतयः ।

42) 2.5.6.6(35)- सँवथ्सरे ।

सँवथ्सर इति सं - वथ्सरे ।

43) 2.5.6.6(36)- वनस्पतयः । तस्मात् ।

वनस्पतय स्तस्मात् तस्माद् वनस्पतयो वनस्पतय स्तस्मात् ।

44) 2.5.6.6(37)- तस्मात् । अहरहः ।

तस्मा दहरह रहरह स्तस्मात् तस्मा दहरहः ।

45) 2.5.6.6(38)- अहरहः । मनुष्याः ।

अहरहर् मनुष्या मनुष्या अहरह रहरहर् मनुष्याः ।

46) 2.5.6.6(38)- अहरहः ।

अहरहरित्यहः - अहः ।

47) 2.5.6.6(39)- मनुष्याः । अशनम् ।

मनुष्या अशन मशनम् मनुष्या मनुष्या अशनम् ।

48) 2.5.6.6(40)- अशनम् । इच्छन्ते ।

अशन मिच्छन्त इच्छन्ते ऽशन मशन मिच्छन्ते ।

49) 2.5.6.6(41)- इच्छन्ते । अर्द्धमासे ।

इच्छन्ते ऽर्द्धमासे ऽर्द्धमास इच्छन्त इच्छन्ते ऽर्द्धमासे ।

50) 2.5.6.6(42)- अर्द्धमासे । देवाः ।

अर्द्धमासे देवा देवा अर्द्धमासे ऽर्द्धमासे देवाः ।

51) 2.5.6.6(42)- अर्द्धमासे ।

अर्द्धमास इत्यर्द्ध - मासे ।

52) 2.5.6.6(43)- देवाः । इज्यन्ते ।

देवा इज्यन्त इज्यन्ते देवा देवा इज्यन्ते ।

53) 2.5.6.6(44)- इज्यन्ते । मासि ।

इज्यन्ते मासि मासीज्यन्त इज्यन्ते मासि ।

54) 2.5.6.6(45)- मासि । पितृभ्यः ।

मासि पितृभ्यः पितृभ्यो मासि मासि पितृभ्यः ।

55) 2.5.6.6(46)- पितृभ्यः । क्रियते ।

पितृभ्यः क्रियते क्रियते पितृभ्यः पितृभ्यः क्रियते ।

56) 2.5.6.6(46)- पितृभ्यः ।

पितृभ्य इति पितृ - भ्यः ।

57) 2.5.6.6(47)- क्रियते । सँवथ्सरे ।

क्रियते सँवथ्सरे सँवथ्सरे क्रियते क्रियते सँवथ्सरे ।

58) 2.5.6.6(48)- सँवथ्सरे । वनस्पतयः ।

सँवथ्सरे वनस्पतयो वनस्पतयः सँवथ्सरे सँवथ्सरे वनस्पतयः ।

59) 2.5.6.6(48)- सँवथ्सरे ।

सँवथ्सर इति सं - वथ्सरे ।

60) 2.5.6.6(49)- वनस्पतयः । फलम् ।

वनस्पतयः फलम् फलं ँवनस्पतयो वनस्पतयः फलम् ।

61) 2.5.6.6(50)- फलम् । गृह्णन्ति ।

फलम् गृह्णन्ति गृह्णन्ति फलम् फलम् गृह्णन्ति ।

62) 2.5.6.6(51)- गृह्णन्ति । यः ।

गृह्णन्ति यो यो गृह्णन्ति गृह्णन्ति यः ।

63) 2.5.6.6(52)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

64) 2.5.6.6(53)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

65) 2.5.6.6(54)- वेद । हन्ति ।

वेद हन्ति हन्ति वेद वेद हन्ति ।

66) 2.5.6.6(55)- हन्ति । क्षुधम् ।

हन्ति क्षुधम् क्षुध(ग्म्) हन्ति हन्ति क्षुधम् ।

67) 2.5.6.6(56)- क्षुधम् । भ्रातृव्यम् ॥

क्षुधम् भ्रातृव्यम् भ्रातृव्यम् क्षुधम् क्षुधम् भ्रातृव्यम् ।

68) 2.5.6.6(57)- भ्रातृव्यम् ॥

भ्रातृव्यमिति भ्रातृव्यम् ।

==========

## 2.5.7 अनुवाकम् 7 – जटा

1) 2.5.7.1(1)- देवाः । वै । (GS-2.5-24)

देवा वै वै देवा देवा वै ।

2) 2.5.7.1(2)- वै । न । (GS-2.5-24)

वै न न वै वै न ।

3) 2.5.7.1(3)- न । ऋचि । (GS-2.5-24)

न र्च्यृचि न न र्चि ।

4) 2.5.7.1(4)- ऋचि । न । (GS-2.5-24)

ऋचि न न र्च्यृचि न ।

5) 2.5.7.1(5)- न । यजुषि । (GS-2.5-24)

न यजुषि यजुषि न न यजुषि ।

6) 2.5.7.1(6)- यजुषि । अश्रयन्त । (GS-2.5-24)

यजुष्यश्रयन्ता श्रयन्त यजुषि यजुष्य श्रयन्त ।

7) 2.5.7.1(7)- अश्रयन्त । ते ।

अश्रयन्त ते ते ऽश्रयन्ता श्रयन्त ते ।

8) 2.5.7.1(8)- ते । सामन्न् ।

ते सामन् थ्सामन् ते ते सामन्न् ।

9) 2.5.7.1(9)- सामन्न् । एव ।

सामन् नेवैव सामन् थ्सामन् नेव ।

10) 2.5.7.1(10)- एव । अश्रयन्त ।

एवा श्रयन्ता श्रयन्तैवैवा श्रयन्त ।

11) 2.5.7.1(11)- अश्रयन्त । हिम् ।

अश्रयन्त हि(ग्म्) हि मश्रयन्ता श्रयन्त हिम् ।

12) 2.5.7.1(12)- हिम् । करोति ।

हिम् करोति करोति हि(ग्म्) हिम् करोति ।

13) 2.5.7.1(13)- करोति । साम ।

करोति साम साम करोति करोति साम ।

14) 2.5.7.1(14)- साम । एव ।

सामैवैव साम सामैव ।

15) 2.5.7.1(15)- एव । अकः ।

एवाक रक रेवैवाकः ।

16) 2.5.7.1(16)- अकः । हिम् ।

अकर्. हि(ग्म्) हि मक रकर्. हिम् ।

17) 2.5.7.1(17)- हिम् । करोति ।

हिम् करोति करोति हि(ग्म्) हिम् करोति ।

18) 2.5.7.1(18)- करोति । यत्र ।

करोति यत्र यत्र करोति करोति यत्र ।

19) 2.5.7.1(19)- यत्र । एव ।

यत्रैवैव यत्र यत्रैव ।

20) 2.5.7.1(20)- एव । देवाः ।

एव देवा देवा एवैव देवाः ।

21) 2.5.7.1(21)- दे॒वाः । अश्रयन्त ।

दे॒वा अश्र॑य॒न्ता श्र॑यन्त दे॒वा दे॒वा अश्र॑यन्त ।

22) 2.5.7.1(22)- अश्र॑यन्त । तत॑: ।

अश्र॑यन्त॒ त॒तस्ततो ऽश्र॑य॒न्ता श्र॑यन्त॒ ततः॑ ।

23) 2.5.7.1(23)- ततः॑ । ए॒व ।

तत॑ ए॒वैव त॒त स्तत॑ ए॒व ।

24) 2.5.7.1(24)- ए॒व । ए॒ना॒न् ।

ए॒वैना॑ नेना॑ ने॒वैवैनान् ।

25) 2.5.7.1(25)- ए॒ना॒न् । प्र ।

ए॒ना॒न् प्र प्रैना॑ नेना॒न् प्र ।

26) 2.5.7.1(26)- प्र । यु॒ङ्क्ते॒ ।

प्र यु॑ङ्क्ते युङ्क्ते॒ प्र प्र यु॑ङ्क्ते ।

27) 2.5.7.1(27)- यु॒ङ्क्ते॒ । हिम् ।

यु॒ङ्क्ते॒ हि(ग्म्) हिँ॑ युङ्क्ते यु॒ङ्क्ते॒ हिम् ।

28) 2.5.7.1(28)- हिम् । क॒रो॒ति॒ ।

हिम् क॑रोति करोति॒ हि(ग्म्) हिम् क॑रोति ।

29) 2.5.7.1(29)- क॒रो॒ति॒ । वा॒चः ।

क॒रो॒ति॒ वा॒चो वा॒चः क॑रोति करोति वा॒चः ।

30) 2.5.7.1(30)- वा॒चः । ए॒व ।

वा॒च ए॒वैव वा॒चो वा॒च ए॒व ।

31) 2.5.7.1(31)- ए॒व । ए॒षः ।

ए॒वैष ए॒ष ए॒वैवैषः ।

32) 2.5.7.1(32)- ए॒षः । योगः॑ ।

ए॒ष योगो॒ योग॑ ए॒ष ए॒ष योगः॑ ।

33) 2.5.7.1(33)- योगः॑ । हिम् ।

योगो॒ हि(ग्म्) हिँ योगो॒ योगो॒ हिम् ।

34) 2.5.7.1(34)- हिम् । क॒रो॒ति॒ ।

हिम् क॑रोति करोति॒ हि(ग्म्) हिम् क॑रोति ।

35) 2.5.7.1(35)- क॒रो॒ति॒ । प्र॒जाः ।

क॒रो॒ति॒ प्र॒जाः प्र॒जाः क॑रोति करोति प्र॒जाः ।

36) 2.5.7.1(36)- प्र॒जाः । ए॒व ।

प्र॒जा ए॒वैव प्र॒जाः प्र॒जा ए॒व ।

37) 2.5.7.1(36)- प्र॒जाः ।

प्र॒जा इति॑ प्र – जाः ।

38) 2.5.7.1(37)- ए॒व । तत् ।

ए॒व तत् तदे॒वैव तत् ।

39) 2.5.7.1(38)- तत् । यज॑मानः ।

तद् यज॑मानो॒ यज॑मान॒ स्तत् तद् यज॑मानः ।

40) 2.5.7.1(39)- यज॑मानः । सृ॒ज॒ते॒ ।

यज॑मानः सृजते सृजते॒ यज॑मानो॒ यज॑मानः सृजते ।

41) 2.5.7.1(40)- सृजते । त्रिः ।

सृजते त्रि स्त्रिः सृजते सृजते त्रिः ।

42) 2.5.7.1(41)- त्रिः । प्रथमाम् ।

त्रिः प्रथमाम् प्रथमाम् त्रि स्त्रिः प्रथमाम् ।

43) 2.5.7.1(42)- प्रथमाम् । अनु ।

प्रथमा मन्वनु प्रथमाम् प्रथमा मनु ।

44) 2.5.7.1(43)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

45) 2.5.7.1(44)- आह । त्रिः ।

आह त्रि स्त्रि राहाह त्रिः ।

46) 2.5.7.1(45)- त्रिः । उत्तमाम् ।

त्रिरुत्तमा मुत्तमाम् त्रि स्त्रिरुत्तमाम् ।

47) 2.5.7.1(46)- उत्तमाम् । यज्ञस्य ।

उत्तमां ँयज्ञस्य यज्ञस्योत्तमा मुत्तमां ँयज्ञस्य ।

48) 2.5.7.1(46)- उत्तमाम् ।

उत्तमामित्युत् - तमाम् ।

49) 2.5.7.1(47)- यज्ञस्य । एव ।

यज्ञस्यैवैव यज्ञस्य यज्ञस्यैव ।

50) 2.5.7.1(48)- एव । तत् ।

एव तत् तदेवैव तत् ।

51) 2.5.7.1(49)- तत् । बर्.सम् ।

तद् बर्.सम् बर्.सम् तत् तद् बर्.सम् ।

52) 2.5.7.1(50)- बर्.सम् । नह्यति ।

बर्.सम् नह्यति नह्यति बर्.सम् बर्.सम् नह्यति ।

1) 2.5.7.2(1)- नह्यति । अप्रस्र(ग्म्)साय ।

नह्य त्यप्रस्र(ग्म्)साया प्रस्र(ग्म्)साय नह्यति नह्य त्यप्रस्र(ग्म्)साय ।

2) 2.5.7.2(2)- अप्रस्र(ग्म्)साय । सन्ततम् ।

अप्रस्र(ग्म्)साय सन्तत(ग्म्) सन्तत मप्रस्र(ग्म्)साया प्रस्र(ग्म्)साय सन्ततम् ।

3) 2.5.7.2(2)- अप्रस्र(ग्म्)साय ।

अप्रस्र(ग्म्)सायेत्यप्र – स्र(ग्म्)साय ।

4) 2.5.7.2(3)- सन्ततम् । अनु ।

सन्तत मन्वनु सन्तत(ग्म्) सन्तत मनु ।

5) 2.5.7.2(3)- सन्ततम् ।

सन्ततमिति सं – ततम् ।

6) 2.5.7.2(4)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

7) 2.5.7.2(5)- आह । प्राणानाम् ।

आह प्राणानाम् प्राणाना माहाह प्राणानाम् ।

8) 2.5.7.2(6)- प्राणानाम् । अन्नाद्यस्य ।

प्राणाना मन्नाद्यस्या न्नाद्यस्य प्राणानाम् प्राणाना मन्नाद्यस्य ।

9) 2.5.7.2(6)- प्राणानाम् ।

प्राणानामिति प्र - अनानाम् ।

10) 2.5.7.2(7)- अन्नाद्यस्य । सन्तत्यै ।

अन्नाद्यस्य सन्तत्यै सन्तत्या अन्नाद्यस्या न्नाद्यस्य सन्तत्यै ।

11) 2.5.7.2(7)- अन्नाद्यस्य ।

अन्नाद्यस्येत्यन्न - अद्यस्य ।

12) 2.5.7.2(8)- सन्तत्यै । अथो ।

सन्तत्या अथो अथो सन्तत्यै सन्तत्या अथो ।

13) 2.5.7.2(8)- सन्तत्यै ।

सन्तत्या इति सं - तत्यै ।

14) 2.5.7.2(9)- अथो । रक्षसाम् ।

अथो रक्षसा(ग्म्) रक्षसा मथो अथो रक्षसाम् ।

15) 2.5.7.2(9)- अथो ।

अथो इत्यथो ।

16) 2.5.7.2(10)- रक्षसाम् । अपहत्यै ।

रक्षसा मपहत्या अपहत्यै रक्षसा(ग्म्) रक्षसा मपहत्यै ।

17) 2.5.7.2(11)- अपहत्यै । राथन्तरीम् ।

अपहत्यै राथन्तरी(ग्म्) राथन्तरी मपहत्या अपहत्यै राथन्तरीम् ।

18) 2.5.7.2(11)- अपहत्यै ।

अपहत्या इत्यप - हत्यै ।

19) 2.5.7.2(12)- राथन्तरीम् । प्रथमाम् ।

राथन्तरीम् प्रथमाम् प्रथमा(ग्म्) राथन्तरी(ग्म्) राथन्तरीम् प्रथमाम् ।

20) 2.5.7.2(12)- राथन्तरीम् ।

राथन्तरीमिति राथं - तरीम् ।

21) 2.5.7.2(13)- प्रथमाम् । अनु ।

प्रथमा मन्वनु प्रथमाम् प्रथमा मनु ।

22) 2.5.7.2(14)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

23) 2.5.7.2(15)- आह । राथन्तरः ।

आह राथन्तरो राथन्तर आहाह राथन्तरः ।

24) 2.5.7.2(16)- राथन्तरः । वै ।

राथन्तरो वै वै राथन्तरो राथन्तरो वै ।

25) 2.5.7.2(16)- राथन्तरः ।

राथन्तर इति राथं - तरः ।

26) 2.5.7.2(17)- वै । अयम् ।

वा अय मयं ँवै वा अयम् ।

27) 2.5.7.2(18)- अयम् । लोकः ।

अयम् ँलोको लोको ऽय मयम् ँलोकः ।

28) 2.5.7.2(19)- लोकः । इमम् ।

लोक इम मिमम् ँलोको लोक इमम् ।

29) 2.5.7.2(20)- इ॒मम् । ए॒व ।

इ॒म मे॒वैवेम मि॒म मे॒व ।

30) 2.5.7.2(21)- ए॒व । लो॒कम् ।

ए॒व लो॒कम् ँलो॒क मे॒वैव लो॒कम् ।

31) 2.5.7.2(22)- लो॒कम् । अ॒भि ।

लो॒क म॒भ्य॑भि लो॒कम् ँलो॒क म॒भि ।

32) 2.5.7.2(23)- अ॒भि । ज॒य॒ति॒ ।

अ॒भि ज॑यति जय त्य॒भ्य॑भि ज॑यति ।

33) 2.5.7.2(24)- ज॒य॒ति॒ । त्रिः ।

ज॒य॒ति॒ त्रि स्त्रिर् ज॑यति जयति॒ त्रिः ।

34) 2.5.7.2(25)- त्रिः । वि ।

त्रिर् वि वि त्रि स्त्रिर् वि ।

35) 2.5.7.2(26)- वि । गृ॒ह्णा॒ति॒ ।

वि गृ॑ह्णाति गृह्णाति॒ वि वि गृ॑ह्णाति ।

36) 2.5.7.2(27)- गृ॒ह्णा॒ति॒ । त्रय॑ः ।

गृ॒ह्णा॒ति॒ त्र॒य॒ स्त्रयो॑ गृह्णाति गृह्णाति॒ त्रय॑ः ।

37) 2.5.7.2(28)- त्रय॑ः । इ॒मे ।

त्रय॑ इ॒म इ॒मे त्र॒य॒ स्त्रय॑ इ॒मे ।

38) 2.5.7.2(29)- इ॒मे । लो॒काः ।

इ॒मे लो॒का लो॒का इ॒म इ॒मे लो॒काः ।

39)  2.5.7.2(30)- लोकाः । इमान् ।

लोका इमा निमान् ँलोका लोका इमान् ।

40)  2.5.7.2(31)- इमान् । एव ।

इमा नेवैवेमा निमा नेव ।

41)  2.5.7.2(32)- एव । लोकान् ।

एव लोकान् ँलोका नेवैव लोकान् ।

42)  2.5.7.2(33)- लोकान् । अभि ।

लोका नभ्यभि लोकान् ँलोका नभि ।

43)  2.5.7.2(34)- अभि । जयति ।

अभि जयति जय त्यभ्यभि जयति ।

44)  2.5.7.2(35)- जयति । बार्.हतीम् ।

जयति बार्.हतीम् बार्.हतीम् जयति जयति बार्.हतीम् ।

45)  2.5.7.2(36)- बार्.हतीम् । उत्तमाम् ।

बार्.हती मुत्तमा मुत्तमाम् बार्.हतीम् बार्.हती मुत्तमाम् ।

46)  2.5.7.2(37)- उत्तमाम् । अनु ।

उत्तमा मन्वनूत्तमा मुत्तमा मनु ।

47)  2.5.7.2(37)- उत्तमाम् ।

उत्तमामित्युत् - तमाम् ।

48)  2.5.7.2(38)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

49) 2.5.7.2(39)- आह । बार्.हतः ।

आह बार्.हतो बार्.हत आहाह बार्.हतः ।

50) 2.5.7.2(40)- बार्.हतः । वै ।

बार्.हतो वै वै बार्.हतो बार्.हतो वै ।

51) 2.5.7.2(41)- वै । असौ ।

वा असा वसौ वै वा असौ ।

52) 2.5.7.2(42)- असौ । लोकः ।

असौ लोको लोको ऽसा वसौ लोकः ।

53) 2.5.7.2(43)- लोकः । अमुम् ।

लोको ऽमु ममुम् ँलोको लोको ऽमुम् ।

54) 2.5.7.2(44)- अमुम् । एव ।

अमु मेवैवामु ममु मेव ।

55) 2.5.7.2(45)- एव । लोकम् ।

एव लोकम् ँलोक मेवैव लोकम् ।

56) 2.5.7.2(46)- लोकम् । अभि ।

लोक मभ्यभि लोकम् ँलोक मभि ।

57) 2.5.7.2(47)- अभि । जयति ।

अभि जयति जय त्यभ्यभि जयति ।

58) 2.5.7.2(48)- जयति । प्र ।

जयति प्र प्र जयति जयति प्र ।

59) 2.5.7.2(49)- प । वः ।

प्र वो वः प्र प्र वः ।

60) 2.5.7.2(50)- वः । वाजाः ।

वो वाजा वाजा वो वो वाजाः ।

1) 2.5.7.3(1)- वाजाः । इति ।

वाजा इतीति वाजा वाजा इति ।

2) 2.5.7.3(2)- इति । अनिरुक्ताम् ।

इत्यनिरुक्ता मनिरुक्ता मिती त्यनिरुक्ताम् ।

3) 2.5.7.3(3)- अनिरुक्ताम् । प्राजापत्याम् ।

अनिरुक्ताम् प्राजापत्याम् प्राजापत्या मनिरुक्ता मनिरुक्ताम् प्राजापत्याम् ।

4) 2.5.7.3(3)- अनिरुक्ताम् ।

अनिरुक्तामित्यनिः – उक्ताम् ।

5) 2.5.7.3(4)- प्राजापत्याम् । अनु ।

प्राजापत्या मन्वनु प्राजापत्याम् प्राजापत्या मनु ।

6) 2.5.7.3(4)- प्राजापत्याम् ।

प्राजापत्यामिति प्राजा – पत्याम् ।

7) 2.5.7.3(5)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

8) 2.5.7.3(6)- आह । यज्ञः ।

आह यज्ञो यज्ञ आहाह यज्ञः ।

9) 2.5.7.3(7)- यज्ञः । वै ।

यज्ञो वै वै यज्ञो यज्ञो वै ।

10) 2.5.7.3(8)- वै । प्रजापतिः ।

वै प्रजापतिः प्रजापतिर् वै वै प्रजापतिः ।

11) 2.5.7.3(9)- प्रजापतिः । यज्ञम् ।

प्रजापतिर् यज्ञं ँयज्ञम् प्रजापतिः प्रजापतिर् यज्ञम् ।

12) 2.5.7.3(9)- प्रजापतिः ।

प्रजापतिरिति प्रजा - पतिः ।

13) 2.5.7.3(10)- यज्ञम् । एव ।

यज्ञ मेवैव यज्ञं ँयज्ञ मेव ।

14) 2.5.7.3(11)- एव । प्रजापतिम् ।

एव प्रजापतिम् प्रजापति मेवैव प्रजापतिम् ।

15) 2.5.7.3(12)- प्रजापतिम् । आ ।

प्रजापति मा प्रजापतिम् प्रजापति मा ।

16) 2.5.7.3(12)- प्रजापतिम् ।

प्रजापतिमिति प्रजा - पतिम् ।

17) 2.5.7.3(13)- आ । रभते ।

आ रभते रभत आ रभते ।

18) 2.5.7.3(14)- रभते । प्र ।

रभते प्र प्र रभते रभते प्र ।

19) 2.5.7.3(15)- प्र । वः ।

प्र वो वः प्र प्र वः ।

20) 2.5.7.3(16)- वः । वाजाः ।

वो वाजा वाजा वो वो वाजाः ।

21) 2.5.7.3(17)- वाजाः । इति ।

वाजा इतीति वाजा वाजा इति ।

22) 2.5.7.3(18)- इति । अनु ।

इत्यन्वन्विती त्यनु ।

23) 2.5.7.3(19)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

24) 2.5.7.3(20)- आह । अन्नम् ।

आहान्न मन्न माहाहान्नम् ।

25) 2.5.7.3(21)- अन्नम् । वै ।

अन्नं वै वा अन्न मन्नं वै ।

26) 2.5.7.3(22)- वै । वाजः ।

वै वाजो वाजो वै वै वाजः ।

27) 2.5.7.3(23)- वाजः । अन्नम् ।

वाजो ऽन्न मन्नं वाजो वाजो ऽन्नम् ।

28) 2.5.7.3(24)- अन्नम् । एव ।

अन्न मेवैवान्न मन्न मेव ।

29) 2.5.7.3(25)- एव । अव ।

एवावा वैवैवाव ।

30) 2.5.7.3(26)- अव । रुन्धे ।

अव रुन्धे रुन्धे ऽवाव रुन्धे ।

31) 2.5.7.3(27)- रुन्धे । प्र ।

रुन्धे प्र प्र रुन्धे रुन्धे प्र ।

32) 2.5.7.3(28)- प्र । वः ।

प्र वो वः प्र प्र वः ।

33) 2.5.7.3(29)- वः । वाजाः ।

वो वाजा वाजा वो वो वाजाः ।

34) 2.5.7.3(30)- वाजाः । इति ।

वाजा इतीति वाजा वाजा इति ।

35) 2.5.7.3(31)- इति । अनु ।

इत्यन्वन्विती त्यनु ।

36) 2.5.7.3(32)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

37) 2.5.7.3(33)- आह । तस्मात् ।

आह तस्मात् तस्मा दाहाह तस्मात् ।

38) 2.5.7.3(34)- तस्मात् । प्राचीनम् ।

तस्मात् प्राचीनम् प्राचीनम् तस्मात् तस्मात् प्राचीनम् ।

39) 2.5.7.3(35)- प्राचीनम् । रेतः ।

प्राचीन(ग्म्) रेतो रेतः प्राचीनम् प्राचीन(ग्म्) रेतः ।

40) 2.5.7.3(36)- रेतः । धीयते ।

रेतो धीयते धीयते रेतो रेतो धीयते ।

41) 2.5.7.3(37)- धीयते । अग्ने ।

धीयते ऽग्ने ऽग्ने धीयते धीयते ऽग्ने ।

42) 2.5.7.3(38)- अग्ने । आ ।

अग्न आ ऽग्ने ऽग्न आ ।

43) 2.5.7.3(39)- आ । याहि ।

आ याहि याह्या याहि ।

44) 2.5.7.3(40)- याहि । वीतये ।

याहि वीतये वीतये याहि याहि वीतये ।

45) 2.5.7.3(41)- वीतये । इति ।

वीतय इतीति वीतये वीतय इति ।

46) 2.5.7.3(42)- इति । आह ।

इत्याहाहे तीत्याह ।

47) 2.5.7.3(43)- आह । तस्मात् ।

आह तस्मात् तस्मा दाहाह तस्मात् ।

48) 2.5.7.3(44)- तस्मात् । प्रतीचीः ।

तस्मात् प्रतीचीः प्रतीची स्तस्मात् तस्मात् प्रतीचीः ।

49) 2.5.7.3(45)- प्रतीचीः । प्रजाः ।

प्रतीचीः प्रजाः प्रजाः प्रतीचीः प्रतीचीः प्रजाः ।

50) 2.5.7.3(46)- प्रजाः । जायन्ते ।

प्रजा जायन्ते जायन्ते प्रजाः प्रजा जायन्ते ।

51) 2.5.7.3(46)- प्रजाः ।

प्रजा इति प्र - जाः ।

52) 2.5.7.3(47)- जायन्ते । प्र ।

जायन्ते प्र प्र जायन्ते जायन्ते प्र ।

53) 2.5.7.3(48)- प्र । वः ।

प्र वो वः प्र प्र वः ।

54) 2.5.7.3(49)- वः । वाजाः ।

वो वाजा वाजा वो वो वाजाः ।

55) 2.5.7.3(50)- वाजाः । इति ।

वाजा इतीति वाजा वाजा इति ।

1) 2.5.7.4(1)- इति । अनु ।

इत्यन्वन्विती त्यनु ।

2) 2.5.7.4(2)- अनु । आह ।

अन्वा हाहा न्वन्वाह ।

3) 2.5.7.4(3)- आह । मासाः ।

आह मासा मासा आहाह मासाः ।

4) 2.5.7.4(4)- मासाः । वै ।

मासा वै वै मासा मासा वै ।

5) 2.5.7.4(5)- वै । वाजाः ।

वै वाजा वाजा वै वै वाजाः ।

6) 2.5.7.4(6)- वाजाः । अर्द्धमासाः ।

वाजा अर्द्धमासा अर्द्धमासा वाजा वाजा अर्द्धमासाः ।

7) 2.5.7.4(7)- अर्द्धमासाः । अभिद्यवः ।

अर्द्धमासा अभिद्यवो ऽभिद्यवो ऽर्द्धमासा अर्द्धमासा अभिद्यवः ।

8) 2.5.7.4(7)- अर्द्धमासाः ।

अर्द्धमासा इत्यर्द्ध – मासाः ।

9) 2.5.7.4(8)- अभिद्यवः । देवाः ।

अभिद्यवो देवा देवा अभिद्यवो ऽभिद्यवो देवाः ।

10) 2.5.7.4(8)- अभिद्यवः ।

अभिद्यव इत्यभि – द्यवः ।

11) 2.5.7.4(9)- देवाः । हविष्मन्तः ।

देवा हविष्मन्तो हविष्मन्तो देवा देवा हविष्मन्तः ।

12) 2.5.7.4(10)- हविष्मन्तः । गौः ।

हविष्मन्तो गौर् गौर्. हविष्मन्तो हविष्मन्तो गौः ।

13) 2.5.7.4(11)- गौः । घृताची ।

गौर् घृताची घृताची गौर् गौर् घृताची ।

14) 2.5.7.4(12)- घृताची । यज्ञः ।

घृताची यज्ञो यज्ञो घृताची घृताची यज्ञः ।

15) 2.5.7.4(13)- यज्ञः । देवान् ।

यज्ञो देवान् देवान्. यज्ञो यज्ञो देवान् ।

16) 2.5.7.4(14)- देवान् । जिगाति ।

देवान् जिगाति जिगाति देवान् देवान् जिगाति ।

17) 2.5.7.4(15)- जिगाति । यजमानः ।

जिगाति यजमानो यजमानो जिगाति जिगाति यजमानः ।

18) 2.5.7.4(16)- यजमानः । सुम्नयुः ।

यजमानः सुम्नयुः सुम्नयुर् यजमानो यजमानः सुम्नयुः ।

19) 2.5.7.4(17)- सुम्नयुः । इदम् ।

सुम्नयुरिद मिद(ग्म्) सुम्नयुः सुम्नयुरिदम् ।

20) 2.5.7.4(17)- सुम्नयुः ।

सुम्नयुरिति सुम्न – युः ।

21) 2.5.7.4(18)- इदम् । असि ।

इद मस्यसीद मिद मसि ।

22) 2.5.7.4(19)- असि । इदम् ।

असीद मिद मस्यसीदम् ।

23) 2.5.7.4(20)- इदम् । असि ।

इद मस्यसीद मिद मसि ।

24) 2.5.7.4(21)- असि । इति ।

असीती त्यस्यसीति ।

25) 2.5.7.4(22)- इति । एव ।

इत्येवैवे तीत्येव ।

26) 2.5.7.4(23)- एव । यज्ञस्य ।

एव यज्ञस्य यज्ञस्यैवैव यज्ञस्य ।

27) 2.5.7.4(24)- यज्ञस्य । प्रियम् ।

यज्ञस्य प्रियम् प्रियं ँयज्ञस्य यज्ञस्य प्रियम् ।

28) 2.5.7.4(25)- प्रियम् । धाम ।

प्रियम् धाम धाम प्रियम् प्रियम् धाम ।

29) 2.5.7.4(26)- धाम । अव ।

धामावाव धाम धामाव ।

30) 2.5.7.4(27)- अव । रुन्धे ।

अव रुन्धे रुन्धे ऽवाव रुन्धे ।

31) 2.5.7.4(28)- रुन्धे । यम् ।

रुन्धे यं ँय(ग्म्) रुन्धे रुन्धे यम् ।

32) 2.5.7.4(29)- यम् । कामयेत ।

यम् कामयेत कामयेत यं ँयम् कामयेत ।

33) 2.5.7.4(30)- कामयेत । सर्वम् ।

कामयेत सर्व(ग्म्) सर्वम् कामयेत कामयेत सर्वम् ।

34) 2.5.7.4(31)- सर्वम् । आयुः ।

सर्व मायु रायुः सर्व(ग्म्) सर्व मायुः ।

35) 2.5.7.4(32)- आयुः । इयात् ।

आयु रिया दिया दायु रायु रियात् ।

36) 2.5.7.4(33)- इयात् । इति ।

इया दितीतीया दिया दिति ।

37) 2.5.7.4(34)- इति । प्र ।

इति प्र प्रेतीति प्र ।

38) 2.5.7.4(35)- प्र । वः ।

प्र वो वः प्र प्र वः ।

39) 2.5.7.4(36)- वः । वाजाः ।

वो वाजा वाजा वो वो वाजाः ।

40) 2.5.7.4(37)- वाजाः । इति ।

वाजा इतीति वाजा वाजा इति ।

41) 2.5.7.4(38)- इति । तस्य ।

इति तस्य तस्ये तीति तस्य ।

42) 2.5.7.4(39)- तस्य । अनूच्य । (GS-2.5-25)

तस्यानूच्या नूच्य तस्य तस्या नूच्य ।

43) 2.5.7.4(40)- अनूच्य । अग्ने । (GS-2.5-25)

अनूच्याग्ने ऽग्ने ऽनूच्या नूच्याग्ने ।

44) 2.5.7.4(40)- अनूच्य । (GS-2.5-25)

अनूच्येत्यनु - उच्य ।

45) 2.5.7.4(41)- अग्ने । आ । (GS-2.5-25)

अग्न आ ऽग्ने ऽग्न आ ।

46) 2.5.7.4(42)- आ । याहि । (GS-2.5-25)

आ याहि याह्या याहि ।

47) 2.5.7.4(43)- याहि । वीतये । (GS-2.5-25)

याहि वीतये वीतये याहि याहि वीतये ।

48) 2.5.7.4(44)- वीतये । इति ।

वीतय इतीति वीतये वीतय इति ।

49) 2.5.7.4(45)- इति । सन्ततम् ।

इति सन्तत(ग्म्) सन्तत मितीति सन्ततम् ।

50) 2.5.7.4(46)- सन्ततम् । उत्तरम् ।

सन्तत मुत्तर मुत्तर(ग्म्) सन्तत(ग्म्) सन्तत मुत्तरम् ।

51) 2.5.7.4(46)- सन्ततम् ।

सन्ततमिति सं - ततम् ।

52) 2.5.7.4(47)- उत्तरम् । अर्द्धर्चम् ।

उत्तर मर्द्धर्च मर्द्धर्च मुत्तर मुत्तर मर्द्धर्चम् ।

53) 2.5.7.4(47)- उत्तरम् ।

उत्तरमित्युत् - तरम् ।

54) 2.5.7.4(48)- अर्द्धर्चम् । आ ।

अर्द्धर्च मा ऽर्द्धर्च मर्द्धर्च मा ।

55) 2.5.7.4(48)- अर्द्धर्चम् ।

अर्द्धर्चमित्यर्द्ध - ऋचम् ।

56) 2.5.7.4(49)- आ । लभेत ।

आ लभेत लभेता लभेत ।

57) 2.5.7.4(50)- लभेत । प्राणेन ।

लभेत प्राणेन प्राणेन लभेत लभेत प्राणेन ।

1) 2.5.7.5(1)- प्राणेन । एव ।

प्राणे नैवैव प्राणेन प्राणे नैव ।

2) 2.5.7.5(1)- प्राणेन ।

प्राणेनेति प्र - अनेन ।

3) 2.5.7.5(2)- एव । अस्य ।

एवास्या स्यैवैवास्य ।

4) 2.5.7.5(3)- अस्य । अपानम् ।

अस्या पान मपान मस्यास्या पानम् ।

5) 2.5.7.5(4)- अपानम् । दाधार ।

अपानम् दाधार दाधारा पान मपानम् दाधार ।

6) 2.5.7.5(4)- अपानम् ।

अपानमित्यप - अनम् ।

7) 2.5.7.5(5)- दाधार । सर्वम् ।

दाधार सर्व(ग्म्) सर्वम् दाधार दाधार सर्वम् ।

8) 2.5.7.5(6)- सर्वम् । आयुः ।

सर्व मायुरायुः सर्व(ग्म्) सर्व मायुः ।

9) 2.5.7.5(7)- आयुः । एति ।

आयु रेत्येत्यायु रायुरेति ।

10) 2.5.7.5(8)- एति । यः ।

एति यो य एत्येति यः ।

11) 2.5.7.5(9)- यः । वै ।

यो वै वै यो यो वै ।

12) 2.5.7.5(10)- वै । अरत्निम् ।

वा अरत्नि मरत्निं ँवै वा अरत्निम् ।

13) 2.5.7.5(11)- अरत्निम् । सामिधेनीनाम् ।

अरत्नि(ग्म्) सामिधेनीना(ग्म्) सामिधेनीना मरत्नि मरत्नि(ग्म्) सामिधेनीनाम् ।

14) 2.5.7.5(12)- सामिधेनीनाम् । वेद ।

सामिधेनीनां ँवेद वेद सामिधेनीना(ग्म्) सामिधेनीनां ँवेद ।

15) 2.5.7.5(12)- सामिधेनीनाम् ।

सामिधेनीनामिति सां - इधेनीनाम् ।

16) 2.5.7.5(13)- वेद । अरत्नौ ।

वेदारत्ना वरत्नौ वेद वेदारत्नौ ।

17) 2.5.7.5(14)- अरत्नौ । एव ।

अरत्ना वेवैवा रत्ना वरत्ना वेव ।

18) 2.5.7.5(15)- एव । भ्रातृव्यम् ।

एव भ्रातृव्यम् भ्रातृव्य मेवैव भ्रातृव्यम् ।

19) 2.5.7.5(16)- भ्रातृव्यम् । कुरुते ।

भ्रातृव्यम् कुरुते कुरुते भ्रातृव्यम् भ्रातृव्यम् कुरुते ।

20) 2.5.7.5(17)- कुरुते । अर्द्धर्चौ ।

कुरुते ऽर्द्धर्चा वर्द्धर्चौ कुरुते कुरुते ऽर्द्धर्चौ ।

21) 2.5.7.5(18)- अर्द्धर्चौ । सम् ।

अर्द्धर्चौ स(ग्म्) स मर्द्धर्चा वर्द्धर्चौ सम् ।

22) 2.5.7.5(18)- अर्द्धर्चौ ।

अर्द्धर्चावित्यर्द्ध - ऋचौ ।

23) 2.5.7.5(19)- सम् । दधाति ।

सम् दधाति दधाति स(ग्म्) सम् दधाति ।

24) 2.5.7.5(20)- दधाति । एषः ।

दधा त्येष एष दधाति दधा त्येषः ।

25) 2.5.7.5(21)- एषः । वै ।

एष वै वा एष एष वै ।

26) 2.5.7.5(22)- वै । अरत्निः ।

वा अरत्निर रत्निर् वै वा अरत्निः ।

27) 2.5.7.5(23)- अरत्निः । सामिधेनीनाम् ।

अरत्निः सामिधेनीना(ग्म्) सामिधेनीना मरत्नि ररत्निः सामिधेनीनाम् ।

28) 2.5.7.5(24)- सामिधेनीनाम् । यः ।

सामिधेनीनां ँयो यः सामिधेनीना(ग्म्) सामिधेनीनां ँयः ।

29) 2.5.7.5(24)- सामिधेनीनाम् ।

सामिधेनीनामिति सां - इधेनीनाम् ।

30) 2.5.7.5(25)- यः । एवम् ।

य एव मेवं ँयो य एवम् ।

31) 2.5.7.5(26)- एवम् । वेद ।

एवं ँवेद वेदैव मेवं ँवेद ।

32) 2.5.7.5(27)- वेद । अरत्नौ ।

वेदा रत्ना वरत्नौ वेद वेदा रत्नौ ।

33) 2.5.7.5(28)- अरत्नौ । एव ।

अरत्ना वेवैवा रत्ना वरत्ना वेव ।

34) 2.5.7.5(29)- एव । भ्रातृव्यम् ।

एव भ्रातृव्यम् भ्रातृव्य मेवैव भ्रातृव्यम् ।

35) 2.5.7.5(30)- भ्रातृव्यम् । कुरुते ।

भ्रातृव्यम् कुरुते कुरुते भ्रातृव्यम् भ्रातृव्यम् कुरुते ।

36) 2.5.7.5(31)- कुरुते । ऋषेर्.ऋषेः ।

कुरुत ऋषेर्.ऋषेर्. ऋषेर्.ऋषेः कुरुते कुरुत ऋषेर्.ऋषेः ।

37) 2.5.7.5(32)- ऋषेर्.ऋषेः । वै ।

ऋषेर्.ऋषेर् वै वा ऋषेर्.ऋषेर्. ऋषेर्.ऋषेर् वै ।

38) 2.5.7.5(32)- ऋषेर्.ऋषेः ।

ऋषेर्.ऋषेरित्यृषेः - ऋषेः ।

39) 2.5.7.5(33)- वै । एताः ।

वा एता एता वै वा एताः ।

40) 2.5.7.5(34)- एताः । निर्मिताः ।

एता निर्मिता निर्मिता एता एता निर्मिताः ।

41) 2.5.7.5(35)- निर्मिताः । यत् ।

निर्मिता यद् यन् निर्मिता निर्मिता यत् ।

42) 2.5.7.5(35)- निर्मिताः ।

निर्मिता इति निः - मिताः ।

43) 2.5.7.5(36)- यत् । सामिधेन्यः ।

यथ् सामिधेन्यः सामिधेन्यो यद् यथ् सामिधेन्यः ।

44) 2.5.7.5(37)- सामिधेन्यः । ताः ।

सामिधेन्य स्ता स्ताः सामिधेन्यः सामिधेन्य स्ताः ।

45) 2.5.7.5(37)- सामिधेन्यः ।

सामिधेन्य इति सां - इधेन्यः ।

46) 2.5.7.5(38)- ताः । यत् ।

ता यद् यत् ता स्ता यत् ।

47) 2.5.7.5(39)- यत् । असँयुक्ताः ।

यदसँयुक्ता असँयुक्ता यद् यदसँयुक्ताः ।

48) 2.5.7.5(40)- असँयुक्ताः । स्युः ।

असँयुक्ताः स्युः स्यु रसँयुक्ता असँयुक्ताः स्युः ।

49) 2.5.7.5(40)- असँयुक्ताः ।

असँयुक्ता इत्यसं - युक्ताः ।

50) 2.5.7.5(41)- स्युः । प्रजया ।

स्युः प्रजया प्रजया स्युः स्युः प्रजया ।

51) 2.5.7.5(42)- प्रजया । पशुभिः ।

प्रजया पशुभिः पशुभिः प्रजया प्रजया पशुभिः ।

52) 2.5.7.5(42)- प्रजया ।

प्रजयेति प्र - जया ।

53) 2.5.7.5(43)- पशुभिः । यजमानस्य ।

पशुभिर् यजमानस्य यजमानस्य पशुभिः पशुभिर् यजमानस्य ।

54) 2.5.7.5(43)- पशुभिः ।

पशुभिरिति पशु - भिः ।

55) 2.5.7.5(44)- यजमानस्य । वि ।

यजमानस्य वि वि यजमानस्य यजमानस्य वि ।

56) 2.5.7.5(45)- वि । तिष्ठेरन्न् ।

वि तिष्ठेरन् तिष्ठेरन्. वि वि तिष्ठेरन्न् ।

57) 2.5.7.5(46)- तिष्ठेरन्न् । अर्द्धर्चौ ।

तिष्ठेरन् नर्द्धर्चा वर्द्धर्चौ तिष्ठेरन् तिष्ठेरन् नर्द्धर्चौ ।

58) 2.5.7.5(47)- अर्द्धर्चौ । सम् ।

अर्द्धर्चौ स(ग्म्) स मर्द्धर्चा वर्द्धर्चौ सम् ।

59) 2.5.7.5(47)- अर्द्धर्चौ ।

अर्द्धर्चावित्यर्द्ध - ऋचौ ।

60) 2.5.7.5(48)- सम् । दधाति ।

सम् दधाति दधाति स(ग्म्) सम् दधाति ।

61) 2.5.7.5(49)- दधाति । सम् ।

दधाति स(ग्म्) सम् दधाति दधाति सम् ।

62) 2.5.7.5(50)- सम् । युनक्ति ।

सं ँयुनक्ति युनक्ति स(ग्म्) सं ँयुनक्ति ।

63) 2.5.7.5(51)- युनक्ति । एव ।

युनक् त्येवैव युनक्ति युनक् त्येव ।

64) 2.5.7.5(52)- एव । एनाः ।

एवैना एना एवैवैनाः ।

65) 2.5.7.5(53)- एनाः । ताः ।

एना स्ता स्ता एना एना स्ताः ।

66) 2.5.7.5(54)- ताः । अस्मै ।

